आमुखम्

भाष्यते अनया इति भाषा। भाषा आशयविनिमयोपाधिः एव। जनसमूहस्य संस्कारिकपश्चात्तलं तत्र विद्यमानस्य जनसमूहस्य भाषाम् आश्रित्यैव वर्तते। पदावलीपरिचायनाय अमरकोशस्य साहाय्यम् अवश्यकमेव। पदावलीसम्पदा मानवस्य पाण्डित्यं भाषापरिचयं च वर्धते। न केवलं पाण्डित्याय किन्तु भाषणाय च पदानि अस्माकं रसनाग्रे वर्तितव्यानि। लोके मित्रस्य यत्स्थानं वर्त्तते तत्सदृशं स्थानं पदस्य वर्त्तते। अतः पदावलीसम्पादनाय अमरकोशस्य पठनम् आवश्यकम्।

संस्कृतसाहित्ये बहवः कोशग्रन्थाः सन्ति। तेषु श्रेष्ठः भवति अमरसिंहस्य अमरकोशः। नामलिङ्गानुशासनम् इत्यपरं नाम तस्य वर्तते। अस्माकं पाठभागे अमरकोशपरिचायनाय केवलं षण्णां पदानां पर्यायपदानि अमरकोशदिशा पठनाय स्वीकृतानि।

आशयाः / धारणाः व्यवहाररूपाणि	पठनप्रवर्तनानि/ पठनतन्त्राणि	पठनाधिगमाः
अमरकोशकारिका पदावलीसम्पादनार्थं बहूपकारकं भवति। श्रवणम्, भाषणम्, लेखनम्।	कारिकावाचनम् कारिकां पठित्वा सामानार्थक पदचयनं लेखनं च। पदानाम् अन्तलिङ्गविभक्ति-वचनानुसारं लेखनम् अवतारणं च।	कारिकां पठति। समानार्थकपदं लिखति। पदानाम् अन्तलिङ्गविभक्तिवचना-नुसारं लिखति वदति च। पदावलिम् आर्जयति। पदकोशं विपुलीकरोति।

उद्देश्यम् - पदावलीसम्पादनम्।

पठननैपूणी - श्रवणम्, भाषणम्, लेखनम्, विवेचनम्, मननं, आलपनम्।

आधारग्रन्थसूची - अमरकोशः।

कालांशः - १२

पठनप्रवर्तनम् - १ पारायणम्

उद्देश्यम् - कारिकाणां पठनम्।

अध्यापकः अमरकोशकारिकायां सूचितानि पदानि (यथा - अटवी, सिंहः, सुमम्....) कर्गजखण्डेषु लिखतु। ततः उत्पीठिकायां स्थापयतु। एकैकः आगत्य चिटिकां स्वीकरोतु। पाठभागं दृष्ट्वा तत्सम्बन्धिनीं कारिकाम् उच्चैः वाचयतु। अध्यापकः उचितं साहाय्यं ददातु। अनन्तरं कारिकालपनक्रीडां प्रचालयतु।

मूल्यनिर्णयसूचिकाः

स्पष्टोच्चारणम्।

उचितस्थाने पदच्छेदः।

अर्थग्रहणम्।

पठनप्रवर्तनम् - २ पदानां विवेचनम्।

उद्देश्यम् - पदानां विविच्य ज्ञानम्।

अध्यापकः छात्रान् पाठभागे स्वीकृतान् वर्गान् अनुसृत्य (यथा - वनवर्गः, मृगवर्गः, क्षत्रियवर्गः इत्यादिरूपेण) सङ्घान् करोतु। वर्गानुसारं छात्रः कारिकां पठित्वा कारिकायां विद्यमानानां पदानि वदतु। टिप्पणीपुस्तके लिखतु च।

मूल्यनिर्णयसूचिकाः

स्पष्टतया वाचनम्।

अर्थावगतिः।

पर्यायपदानां ग्रहणम्।

पठनप्रवर्तनम् ३ **पदकेली।**

उद्देश्यम् - पदावलीसम्पादनम्।

अध्यापकः छात्राणां सङ्घद्वयं करोतु। कारिकाणां सम्यक् पठनाय निर्दिशतु। प्रथमसङ्घः एकं पदं वदतु, द्वितीयसङ्घः तस्य समानपदं वदतु। एवम् अनुवर्ततु, अध्यापकः उचितसाहाय्यं ददातु।

यथा - प्रथमसङ्घः- दन्ती। अपरसङ्घः - हस्ती।

मूल्यनिर्णयसूचिकाः

पदानां निर्धारणम्।

केलीचालनम्।

आशयावगमनम्।

पठनप्रवर्तनम् - ४ **पदपूरण स्पर्धा।**

उद्देश्यम् - **पदपरिचायनम्।**

प्रक्रिया

अध्यापकः श्यामफलके कानिचन अक्षराणि लिखति

यथा- ष, मू, न, वा, कः, रः, भे, नं, व तदक्षरयुक्तपदनिर्माणाय वदतु। प्रवर्तनमिदं वैयक्तिकं भवतु। यथा - मूषकः, वानरः, भेकः, इत्यादयः। ततः छात्रान् सङ्घद्वयं कृत्वा पाठपुस्तके विद्यमान पदपूरणाय निर्दिशतु। अध्यापकः उचित साहाय्यं करोतु।

मूल्यनिर्णयसूचिकाः

पदबोधः।

अक्षरैः पूरणम्।

उचितपदलेखनम्।

प्रवर्तनम् - ५ पर्यायपदनिर्माणम्।

उद्देश्यम् - पर्यायपदज्ञानम्।

प्रक्रिया

अध्यापकः कानिचन पदानि तेषां पर्यायपदानि च श्यामफलके लिखतु। ततः छात्रान् एकैकं पदं तस्य पर्यायपदं च चित्वा टिप्पणिपुस्तके लेखनाय निर्दिशतु। लिखितानि संशोधयन्तु। ये उत्तमरीत्या कृतवन्तः ते अभिनन्दनीयाः।

पदानि यथा - नयनं, जलं, मनः, वसुधा, नेत्रं, चित्तं, भूमिः।

अध्यापकः छात्रान् सङ्घद्वयं कृत्वा पाठपुस्तकस्थां पट्टिकां पठित्वा कोष्टकाद् अक्षराणि स्वीकृत्य पर्यायपदानि निर्माय पट्टिकां पूरयतु इति निर्दिशतु। मूल्यनिर्णयमपि करोतु।

मूल्यनिर्णयसूचिकाः

पदबोधः।

पर्यायपदग्रहणम्।

अक्षरैः पूरणम्।

उदा - करी - गजः

पट्टिका

करी	पुष्पं	शार्दूलः	सिंहः	काननं
गजः दन्ती	सुमं प्रसूनम्	व्याघ्रः केसरी	मृगेन्द्रः	अटवी

पठनप्रवर्तनम् - ६ पदपूरणम्।

उद्देश्यम् - पदज्ञानम्

प्रक्रिया - अध्यापकः चार्ट्पत्रे कानिचन अपूर्णपदानि विलिख्य प्रदर्शयतु।

यथा - शु — कः, वृ — भः, प — सम्, च — कः, — म्रं , कम — म्

कोष्ठके कानिचन अक्षराण्यपि लिखतु

यथा - आ, न, ष,ल। तानि अक्षराण्युपयुज्य पदपूरणाय निर्दिशतु। उचितं साहाय्यं देयम्। मूल्यनिर्णयमपि करोतु।

यथा - शुनकः, वृषभः, पनसम्, चषकः, आम्रं, कमलम्)

ततःछात्रान् सङ्घान् कृत्वा पाठपुस्तकस्थं प्रवर्तनम् उचितम् अक्षरमुपयुज्य पूरणाय निर्दिशतु। मूल्यनिर्णयमपि करोतु।

मूल्यनिर्णयसूचिकाः

पदबोधः।

अर्थावगतिः।

अक्षरैः पूरणम्।

उत्तराणि

वारणः।

वसिष्ठः।

सुमनसः।

कण्ठीरवः।

अटवी

पठनप्रवर्तनम् ७ **विजातीयपदम्।**

उद्देश्यम् - विजातीयपदज्ञानम्।

अध्यापकः चतुर्णां पुष्पाणां नामानि एकस्य फलस्य नाम च चार्ट्पत्रे विलिख्य प्रदर्शयतु। (यथा - जपाकुसुमं, सेवन्तिका, सूर्यकान्तिः, पाटलम्, कदलीफलम्) तत्समानमेव चतुर्णां मृगाणाम् एकस्य पक्षिणः च नामानि विलिख्य प्रदर्शयतु। (यथा - गजः, अजः, काकः, धेनुः, अश्वः) ततः छात्राः विजातीयं पदं चित्वा वदन्तु।

मूल्यनिर्णयसूचिकाः।

पदबोधः।

अर्थग्रहणम्।

उचितरीत्या चयनम्।

पट्टिका - १

सजातीयपदं (पुष्पाणि) विजातीयपदं (फलम्)

जपाकुसुमं	कदलीफलम्
सेवन्तिका सूर्यकान्तिः पाटलम्	

पट्टिका - २

पशवः	पक्षी
गजः अजः धेनुः अश्वः	काकः

ततः छात्रान् सङ्घान् कृत्वा पाठभागं पठित्वा नामपदानां क्रियापदानां च विवेचनाय निर्दिशतु। मूल्यनिर्णयमपि करोतु।

विजातीयपदानि - करोति, अपिबत्, गच्छति।

पठनप्रवर्तनं - ८ **पर्यायपदलेखनम्।**

उद्देश्यम् - पर्यायपदज्ञानम्।

प्रक्रिया - पाठभागं पठित्वा पर्यायपदानां चित्वा लेखनाय अध्यापकः छात्रान् निर्दिशतु।

पर्यायपदानि

सिंहः -मृगेन्द्रः, कण्ठीरवः, पञ्चास्यः।

गजः - दन्ती ,हस्ती, केसरी।

मुल्यनिर्णयसुचिकाः

कारिकापारायणम्।

अर्थावबोधः।

पर्यायपदग्रहणम्।